শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীৱেঙ্কটেশতৃণকম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

# ॥শ্রীৱেঙ্কটেশতূণকম্ ॥

ৱজ্রশঙ্খবাণচাপচিহ্নিতাঙ্ঘ্রিপঙ্কজং
    নর্তিতাযুতারুণাগ্র্যনিসসরতপ্রভাকুলম্।
ৱজ্রপাণিমুখ্যলেখৱন্দিতং পরাতপরং
    সজ্জনার্চ্চিতং ৱৃষাদ্রিসার্ৱভৌমমাশ্রযে॥ ১ ॥

পঞ্চবাণমোহনং ৱিরিঞ্চিজন্মকারণং
    কাঞ্চনাম্বরোজ্জ্বলং সচঞ্চলাম্বুদপ্রভম্।
চঞ্চরীকসঞ্চযাভচঞ্চলালকাৱৃতং
    কিঞ্চিদুদ্ধতভ্রুৱং চ ৱঞ্চকং হরিং ভজে॥ ২ ॥

মঙ্গলাধিদৈৱতং ভুজঙ্গমাঙ্গশাযিনং
    সঙ্গরারিভঙ্গশৌণ্ডমঙ্গদাধিকোজ্জ্বলম্।
অঙ্গসঙ্গিদেহিনামভঙ্গুরার্থদাযিনং
    তুঙ্গশেষশৈলভৱ্যশৃঙ্গসঙ্গিনং ভজে॥ ৩ ॥

কম্বুকণ্ঠমম্বুজাতডম্বরাম্বকদ্বযং
    শম্বরারিতাতমেনমম্বুরাশিতল্পগম্।
বম্ভরার্ভকালিভৱ্যলম্বমানমৌলিকং
    শঙ্খকুন্দদন্তৱন্তমুত্তমং ভজামহে॥ ৪ ॥

পঙ্কজাসনার্চতং শশাঙ্কশোভিতাননং
    কঙ্কণাদিদিৱ্যভূষণাঙ্কিতং ৱরপ্রদম্।
কুঙ্কুমাঙ্কিতোরসং সশঙ্খচক্রনন্দকং
    ৱেঙ্কটেশমিন্দিরাপদাঙ্কিতং ভজামহে॥ ৫ ॥

॥ ইতি শ্রীৱেঙ্কটেশতূণকং সমাপ্তম্ ॥